जुलाई, अगस्त, सितम्बर २०१७ ईसवीयाब्दः ओ३म् R.N.I. No. UPBIL/१९९८/१४८५


ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

'भारते भातु भारती'

'यज्ञो वै श्रेष्ठतमं कर्म'

हरिः यज्ञशाला



यज्ञशाला इयं गुरुकुलमहाविद्यालयज्वालापुरस्य तत्कालीनप्रधानवर्यैः परमदानवीर-वत्सकुलावतंश-श्री-पं.हरिवंशवत्समहाभागैः धर्मार्थनिर्मिता

दूरभाष ९२१९४०६०७८, ९२१९४०६०७४ (ज्वालापुरम्) तारगृहम्- महाविद्यालयः ज्वालापुरम्


## भारतोदयः

**संस्कृत-मासिकपत्रम्**

| वर्षम् | अङ्काः |
| --- | --- |
| १०८ | १,२,३ |

सम्पादकः:
**डॉ. हरिगोपालशास्त्री**
व्याकरणाचार्यः
एम.ए., पी-एच. डी.
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
**डॉ. सुशीलकुमार त्यागी**
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रबन्ध-सम्पादकः
**डॉ. अजयकौशिकः**
साहित्याचार्यः
एम.ए., पी-एच. डी.

प्रकाशकः
**गुरुकुलमहाविद्यालयः ज्वालापुरम्**
हरिद्वारम्-२०९४०४
(उत्तरांखण्ड-प्रदेशः)

**शुल्क-विवरणम्**

| | |
| --- | --- |
| प्रत्यङ्कम्- | १०/- |
| वार्षिकम्- | १००/- |
| आजीवनम्- | १०००/- |


# विषयानुक्रमणिका


| | | |
| --- | --- | --- |
| १. श्रुति-सुधा | महर्षिदयानन्दसरस्वती | ३ |
| २. कालिदासस्य कृतिषु यज्ञपरम्परा (२) | आचार्यवेदप्रकाशशास्त्री | ४ |
| ३. शारदाविनयम् | प्रो. रामदत्तशर्मा | ९ |
| ४. आचार्यबच्चूलालावस्थिप्रणीतस्य भारतीयदर्शन-बृहत्कोशस्य परिचयः | डॉ. व्रजेद्रकुमारसिंहदेवः | १० |
| ५. श्रीमद्दयानन्द-पञ्चकम् | डॉ. प्रशस्यमित्र शास्त्री | १४ |
| ६. पुराणेषु रासविमर्श | बबीता लसियाल | १५ |
| ७. नागो राजकुमारः (कूर्मांचलीय-कथा) | अनुवादकः डॉ. प्रकाशचन्द्रपन्त 'दीपः' | १७ |
| ८. वृष्टिजलं रक्षणीयम् | डॉ. रामकिशोरमिश्रः | २० |



**राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्**

**भारतोदयः (संस्कृत-मासिकम्)**

(RNI Regd. No. UPBIL/1998/1485)

| | |
| --- | --- |
| १. प्रकाशनस्थानम् | ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्) |
| २. प्रकाशनकालावधिः | मासिकम् |
| ३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च | डा. हरिगोपालशास्त्री, भारतीयः गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |
| ४. पत्राधिकारिणां नाम्ना सह सङ्केतः पत्रालयः - | ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) |

डॉ. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

# भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन्॥

x x x

निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'॥

वर्षम्- १०८ | श्रावणः, भाद्रपदः, आश्विनः २०७४ विक्रमाब्दः ✷ जुलाई, अगस्त, सितम्बर २०१७ ईसवीयाब्दः | अङ्काः- १,२,३

## ✷ श्रुति-सुधा ✷

ओ३म् द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद् भियसा वज्र इन्द्र ते ।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥

ऋग्वेदः १.१०.५२.१०

पदार्थः-

(द्यौः) प्रकाशः (चित्) इव (अस्य) वक्ष्यमाणस्य (अमवान्) बलवान् (अहेः) मेघस्य (स्वनात्) शब्दात् (अयोयवीत्) पुनः पुनर्मिश्रयत्यमिश्रयति वा (भियसा) भयेन (वज्रः) शस्त्रास्त्रसमूहः (इन्द्रः) परमैश्वर्यहेतो (ते) तव (वृत्रस्य) मेघस्य (यत्) यस्य (बद्बधानस्य) बन्धकस्य। अत्र बन्धधातोश्चानश्। **बहुलं छन्दसि [अ. २.४.७६]** इति शपः श्लुः, हलादिशेषाऽभावश्च। (रोदसी) द्यावापृथिव्यौ (मदे) हर्षकारके व्यवहारे (सुतस्य) उत्पन्नस्य (शवसा) बलेन (अभिनत्) भिनत्ति (शिरः) उत्तमाङ्गम् ॥१०॥

भावार्थः-

**यथा सूर्यकिरणा विद्युच्च मेघं प्रति प्रवर्त्तन्ते, तथैव सेनापत्यादिभिर्भवितव्यम् ॥ ९॥**

**-महर्षिदयानन्दसरस्वती**

[ऋग्वेदभाष्यम्, तृतीयो भागः, ३२पृष्ठे]

मई, जून२०१७ इत्यस्मानुवृत्तम्

# ✷ कालिदासस्य कृतिषु यज्ञपरम्परा(२) ✷

आचार्यवेदप्रकाशशास्त्री,

आचार्यः कुलपतिचरश्च, गुरुकुल-कांगडी-विश्वविद्यालयः (हरिद्वार)

कालिदास्येयं मान्यतास्ति यत् प्रातःकाले सायंकालेऽपि च होमकर्मकरणीयम्। अत एवासौ शाकुन्तलस्य तृतीयाङ्के सायंकालिकं यज्ञं वर्णयामास, यथा-

**सायंतने सवनकर्मणि संप्रवृत्ते**
**वेदीं हुताशनवतीं परितः प्रकीर्णाः।**
**छायाश्चरन्ति बहुधा भयमादधानाः**
**संध्यापयोदकपिशाः पिशिताशनानाम्॥** [१]

रघुवंशस्य प्रथमे सर्गे यदा दिलीपो वसिष्ठमुपागमत्तदा राजा स्वविषये परिचयं प्रयच्छन् स्वकीयां यज्ञनिष्ठां प्रकटयन् कथयामास-

**सोऽहमिज्या विशुद्धात्मा प्रजालोपनिमीलितः।**
**प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥** [२]

गुरोर्वसिष्ठस्य प्रशंसा कुर्वन् दिलीपस्तस्य यज्ञकर्तृत्वमेव प्राधान्येनामन्यत्। यथा-

**हविरावर्जितं होतस्त्वया विधिवदग्निषु।**
**वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम्॥** [३]

**अतिथियज्ञः-** अतिथियज्ञस्य गणना नित्ययज्ञेषु क्रियते, मनुष्याणां कर्त्तव्यमस्ति यत्ते प्रतिदिनं गृहागतानां ब्राह्मणानामन्येषां पूज्यानाञ्च स्वागतं जलान्नादीनां दानेन कुर्युः। कस्यचिदपि गृहादतिथिर्भग्नाशो भूत्वा मा निर्गच्छेदित्यस्मिन् विषये पाराशरी-स्मृतिरपि व्यवस्थां विबोधयति-

**अतिथिर्यस्यभग्नाशो गृहात्प्रतिनिवर्तते।**
**पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च॥**
**काष्ठभारसहस्रेण घृतकुम्भशतेन च।**
**अतिथिर्यस्य भग्नाशस्तस्य होमो निरर्थकः॥** [४]

कालिदाससाहित्येऽतिथिज्ञस्य महत्त्वं पदे-पदे विराजते। दुष्यन्तो यदा कण्वाश्रमं विवेश तदा तत्स्वागतं तत्रत्यास्तपस्विनस्तपस्विन्यश्च चक्रुः। ऋषिः कण्वः क्व गत इति पृच्छति दुष्यन्ते तपस्विरूपधारिणा वैखानसेनोत्तरितम्-

'इदानीमेव दुहितरं शकुन्तलामतिथि-सत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः॥'

---

१ .अभिज्ञानशाकुन्तलम् ३.२४
२ .रघुवंशमहाकाव्यम् १.६८
३ .रघुवंशमहाकाव्यम् १.६२
४ .पाराशरस्मृतिः १.३५, ३६

शाकुन्तलस्य चतुर्थाङ्के यदा दुष्यन्तासकृचित्तया शकुन्तलया द्वारमुपागतोऽतिथिदुर्वासाख्यो मुनिर्न मानितस्तदा तया स्वजीवनविनाशाय कापि पापचेष्टा कृता, अत एवासत्कृतिमवाप्यासौ दुर्वासा तां शप्तवान्, यथा-

**विचिन्तयन्ती यमनन्यमानसा**

**तपोधनं वेत्सि न मामुपस्थितम्।**

**स्मरिष्यति त्वां न स बोधितोऽपि सन्**

**कथां प्रमत्तः प्रथमं कृतामिव॥** [१]

रघुवंशस्य पञ्चमे सर्गे यदा कौत्सो राजान रघुमुपैति तदा रघुस्तदानीं स्वर्णपात्राणाम् अभावान्मृन्मये पात्रे पूजाद्रव्यं निधाय तत्स्वागतं व्याजहार। यथा -

**स मृन्मये वीतहिरण्मयत्वात्**

**पात्रे निधायार्घ्यमनर्घशीलः।**

**श्रुतप्रकाशं यशसा प्रकाशः**

**प्रत्युज्जगामातिथिमातिथेयः॥** [२]

कौत्सस्तु विश्वजिति यज्ञे निःशेषविश्राणितकोषजातं रघुं विलोक्य चिन्तयामास यत्रेदानीं गुरुदक्षिणार्थिना मया राजा रघुरयमधिकदानविषये वक्तव्यः। कौत्स इत्थं विचिन्त्य रघुगृहात्प्रतिनिवृत्तिमियैष, परं रघुणासौ प्रार्थितोऽभूद्यत्र त्वया भग्नाशेन मे गृहाद् गन्तव्यम्। भग्नाशे गते त्वयि जगत्यां मद्विषये क्वचिन्नवीनः परीवादावतारो भविष्यति, अतो भवानिहैव वसतु, दिनद्वयानन्तरं गुरुदक्षिणायास्ते सर्वा व्यवस्था भविष्यति। यथा-

**गुर्वर्थमर्थी श्रुतपारदृश्वा**

**रघोः सकाशादनवाप्य कामम्।**

**गतो वदान्यान्तरमित्ययं मे**

**मा भूत् परीवादनवावतारः॥** [३]

तथैव च-

**सत्वं प्रशस्ते महते मदीये**

**वसंश्चतुर्थोऽग्निरिवाग्न्यागारे।**

**द्वित्राण्यहाण्यर्हसि सोढुमर्हन्**

**यावद् यते साधयितुं त्वदर्थम्॥** [४]

एवं प्रकारेण रघुः कौत्सं सम्पूज्य गृहे वसति दत्त्वा च समायाते समये पूर्णया गुरुदक्षिणया तं भृशमर्चयामास। यदा कश्चिदतिथिरायाति तद्वा पयसा, विष्टरेण, कन्देन, मूलेन, फलेन, सूनृतया गिरा च तत्सत्कृतिर्विधेया। परमात्मरूपमिव मत्त्वातिथिरर्चनीयः। यतो हि कस्यचिद् भाग्यशालिन एव गृहमेधिनो गृहे समायान्ति ब्रह्मवर्चसोऽर्चनीयाचारा अतिथयः। यदा शरभङ्गनामा ऋषिः स्वशरीरं यज्ञाग्नावहौषीत् तदा दिवङ्गते तस्मिन् तदाश्रममुपगानतिथीन् कः सम्मानयिष्यति, इति प्रश्ने समुद्गते शङ्कां निराकर्तुं कालिदासः कथयति यद्यथा दिवंगते पितरि

---

१ .अभिज्ञानशाकुन्तलम् ४.१

२ .रघुवंशमहाकाव्यम् ५.२

३ .रघुवंशमहाकाव्यम् ५.२४

४ .रघुवंशमहाकाव्यम् ५.२५

तत्पुत्रस्तदीयामखिलामपि परम्परां परिपुष्णाति, तत्परिचितान् सत्करोति, गृहागतानर्चयति च तथैवास्य शरभंग-नाम्नो मुनेरपत्यभूता इमे वृक्षाः समागतानां सम्मानं करिष्यन्तीति। यथा-

**छायाविनीताध्वपरिश्रमेषु**
**भूयिष्ठ संभाव्य फलेष्वमीषु।**
**तस्यातिथीनामधुना सपर्या**
**स्थिता सुपुत्रेष्विव पादपेषु॥**[१]

रघुवंशस्य त्रयोदशे सर्गे रामेण सत्कृतानां सुग्रीव-विभीषणादीनां वर्णनं कालिदासेनातीव चारुतया कृतम्। एवं प्रकारेण कालिदासो यथावसरमतिथियज्ञस्य महिमानं प्रकटयामास प्रेरयामास च काव्यकथया सर्वाञ्जनानतिथि-यज्ञकरणाय।

**पितृयज्ञः**- मनुना 'पितृयज्ञस्तु तर्पणम्' इत्युदीर्य गुरुस्थानीयानां सर्वेषामपि श्रद्धया क्रियमाणम् अभिनन्दनं पितृयज्ञत्वेनैव समर्थितम्। 'श्राद्धैः पितृनर्चयेत्' इत्यनुसारं पितृभ्यः श्रद्धया दत्तं सर्वं श्राद्धमेवोच्यते। लोके प्रतिष्ठितानामेव पितृणां श्राद्धं क्रियते, यतो हि जीविता हि पितरः पुत्रकृतां सेवामनुभवन्ति, दत्तं पदार्थञ्चोपभुञ्जते। कालिदासेन पितृयज्ञस्य वर्णनं स्थाने-स्थाने वैदिकपरम्परा-अनुसारमेव कृतम्। रघुवंशस्य प्रथमे सर्गे यदा दिलीपो वसिष्ठाश्रमं प्रपेदे तथा दिलीपः स्वभार्यया

१ .रघुवंशमहाकाव्यम् १३.४६

सहितः स्वगुरोर्गुरुपत्न्याश्चरण-वन्दनामकरोत्। यथा-

**तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।**
**तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः॥**[२]

एवमेव द्वितीयेऽपि सर्गे राजा दिलीपो नन्दिन्याः सेवां कुर्वन् गुरोरपि सेवां तथैव करोति। यथा-

**गुरोः सदारस्य निपीड्य पादौ,**
**समाप्य सांध्यं च विधिं दिलीपः।**
**दोहावसाने पुनरेव दोग्ध्रीं**
**भेजे भुजोच्छिन्नरपुर्निषण्णाम्॥**[३]

रामेण सह वनात्प्रत्यागता सीता कौशल्यायाश्चरणयोर्नतिं करोति, तत्र सीतायाः प्रणामप्रकारः सहृदयानामाह्लादकर एव जातः। यथा-

**क्लेशावहा भर्तुरलक्षणाहं,**
**सीतेति नाम स्वमुदीरयन्ती।**
**स्वर्गप्रतिष्ठस्य गुरोर्महिष्या-**
**वभक्ति भेदेन वधूर्ववन्दे॥**[४]

यदा कौशिकेन याचितौ रामलक्ष्मणौ पितुरादेशात् गन्तुं प्रवृत्तौ जातौ, तदा तावुभावपि मातृणां चरणवन्दनां चक्रतुः। यथा-

२ .रघुवंशमहाकाव्यम् १.५७
३ .रघुवंशमहाकाव्यम् २.२३
४ .रघुवंशमहाकाव्यम् १४.५

मातृवर्गचरणस्पृशौ मुने-
स्तौ प्रपद्य पदवीं महौजसः।
रेजतुर्गतिवशात् प्रवर्तिनौ
भास्करस्य मधुमाधवाविव॥[१]

**भूतयज्ञः**- मनुना 'बलिर्भौतः' इत्युदीर्य बलिरूपेण भूतानां कृते प्रदत्त वस्तु भूतयज्ञं निवेशितम्। ये कृमिकीटपतङ्गादयः प्राणिनः सन्ति, तेषामपि कृते बलिव्यवस्था कृता। एकस्मिन् स्थाने मनुना भूतयज्ञस्य व्यवस्थां प्रयच्छता कथितम्-

**शुनां च पतितानां च श्वपचां पापरोगिणाम्।**
**वायसानां कृमीणां च शनकैर्निर्वपेद् भुवि॥**[२]

मनुना यत्र चैतन्यधारिणां कृते बलिव्यवस्थया भूतयज्ञस्य स्वरूपं प्रकटितं तथैव वनस्पतीनां जलादिभिः सेचनमपि भूतयज्ञत्वेनैव स्वीकृतम्। यथा-

**मरुदभ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि।**
**वनस्पतिभ्य इत्येव मुसलोलूखले हरेत्॥**[३]

कालिदासः शाकुन्तले कण्वाश्रमे तपस्विभिः कृतं भूतयज्ञं प्रकारान्तरेण वर्णयति। यथा-

**नीवाराः शुककोटरार्भकमुखभ्रष्टास्तरुणामधः।**[४]

भूमौ शुकमुखभ्रष्टान् नीवारकणान् विलोक्य ज्ञायते यत् शुकानां कृते मुनिभिर्बलिरूपेण नीवारास्तेषां कोटरे संस्थापिताः।

१ .रघुवंशमहाकाव्यम् ११.७
२ .मनुस्मृतिः ३.९३
३ .मनुस्मृतिः ३.८८
४ .अभिज्ञानशाकुन्तलम् १.१३

शकुन्तलया मृगास्तृणकवलदानैर्नितरां पालिताः परिवर्धिताश्च। लता अपि तया कलशसलिलसेकेन सुतरां वृद्धिं नीताः। सीतया रघुवंशस्य चतुर्दशे सर्गे आश्रमस्य बालवृक्षा नित्यं घटाम्बुभिर्सिक्ताः। शकुन्तला यं मृगशिशुं पुत्रमिव पालितवती, तस्य वर्णनं कालिदासेनेत्थं कृतम्-

**यस्य त्वया व्रणविरोपणमिङ्गुदीनां**
**तैलं न्यषिच्यत मुखे कुश सूचिबिद्धे।**
**श्यामाकमुष्टिपरिबर्धितको जहाति**
**सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥**[५]

एवं कालिदासेन भूतयज्ञस्य मनुप्रतिपादित एव प्रकारः स्वकाव्ये प्रदर्शितः।

**नैमित्तिकयज्ञाः**- निमित्तवशाद्येषां यज्ञानां सम्पादनं भवति, ते यज्ञा नैमित्तिकनाम्ना व्यवह्रियन्ते। गर्भाधानकालादारभ्यान्त्येष्टिपर्यन्तं येऽपि समये-समये मनुष्याणां संस्कारा यज्ञानुष्ठानेन क्रियन्ते, ते सर्वेऽपि नैमित्तिकयज्ञविधिना विधेयाः। कदापि मनुष्याः स्वर्गकामनया पुत्रकामनया कीर्तिकामनया अन्यया कयाचित्कामनया वा यदि यज्ञं कुर्वन्ति, तदा तेऽपि यज्ञा नैमित्तिकयज्ञा एव। कालिदासेन नैमित्तिकयज्ञानामपि वर्णनं सावधानतया कृतम्। रघुवंशे दिलीपः स्वपुत्रस्य रघोर्नामकरणादिकं सर्वं यज्ञमाध्यमेनैव सम्पादयामास।

रघोरुपनयनसंस्कारं विधाय गुरवस्तं पाठयामासुः। यथा-

५ .अभिज्ञानशाकुन्तलम् ४.१४

**अथोपनीतं विधिवद् विपश्चितो,**
**विनिन्युरेनं गुरवो गुरुप्रियम्।**
**अबन्ध्ययत्नाश्च बभूवुरत्र ते,**
**क्रिया हि वस्तूपहिता प्रसीदति॥** [१]

पूर्णां विद्यां संप्राप्य गुरुणां सकाशादागतस्य रघुप्रवरस्य समावर्तनसंस्कारं यथाविधि राजादिलीपश्चकार। समावर्तनं सम्पाद्य च विवाहसंस्कारमपि तथैव विधिपूर्वकं चकार। यथा-

**अथास्य गोदानविधेरनन्तरं,**
**विवाहदीक्षां निरवर्तयद् गुरुः।**
**नरेन्द्रकन्यास्तमवाप्य सत्पतिं**
**तमोनुदं दक्षसुता इवाबभुः॥** [२]

राजा दिलीपेन यदाश्वमेधयज्ञः समारब्धस्तदा तेन यज्ञाश्वरक्षणे स्वपुत्रो रघुरेव नियुक्तः। यथा-

**नियुज्य तं होमतुरङ्गरक्षणे,**
**धनुर्धरं राजसुतैरनुद्रुतम्।**
**अपूर्णमेकेन शतक्रतूपमः**
**शतं क्रतूनामपविघ्नमाप सः॥** [३]

पुरा राजानः स्वकीर्तिप्रसारणाय विश्वजिदाख्यं यज्ञं सम्पाद्य कृतकृत्यमिवात्मानं मन्यन्ते स्म। तथैव राजा रघुरपि विश्वजिति यज्ञे सर्वमपि कोषजातं ब्राह्मणेभ्यो याचकेभ्यश्च दत्त्वा नितरां हर्षमभजत्। कालिदासः कृताध्वरस्य रघोर्वर्णनमेकेन पद्येन करोति-

**तमध्वरे विश्वजिति क्षितीशं,**
**निःशेषविश्राणितकोषजातम्।**
**उपात्तविद्यो गुरुदक्षिणार्थी**
**कौत्सः प्रपेदे वरतन्तु शिष्यः॥** [४]

रघुर्यदा दिग्विजयं कर्त्तुं प्रस्थानं कुर्वन् इवास्ते तदासौ यज्ञाग्निं दीपयति यज्ञक्रियां समाप्यैवासौ प्रस्थानं करोति। यथैकेन श्लोकेन सुस्पष्टमेवावगम्यते-

**तस्मै सम्यक् हुतो वह्निर्वाजिनीराजनाविधौ।**
**प्रदणार्चिव्याजेन हस्तेनैव जयं ददौ॥** [५]

एवं कालिदासेन नित्ययज्ञानां नैमित्तिकयज्ञानां च समीचीनतया स्वकीयासु कृतिषु वर्णनं विधाय वैदिकपरम्पराणां रक्षणं प्रसारणं प्रचारणञ्च कृतम्। काव्यादेवाल्पधियामपि चतुर्वर्गफलप्राप्तिः सुखाज्जायते। तत्र च चतुर्वर्गे सर्वप्रथमं धर्म एव गण्यते, धर्मव्याख्यानावसरेऽपि च धर्मस्य त्रिषु स्कन्धेषु यज्ञ एव प्रथमस्कन्धत्वेन स्वीकृतः। अतः कालिदासो नूनमेव यज्ञप्रथां प्रथयन् ऋषीणां, मुनीनां विदुषां देवानां सतां च कार्यजातं काव्यरचनाव्याजेन वर्धयामास।

●

१ .रघुवंशमहाकाव्यम् ३.२९
२ .रघुवंशमहाकाव्यम् ३.३३
३ .रघुवंशमहाकाव्यम् ३.३८
४ .रघुवंशमहाकाव्यम् ५.१
५ .रघुवंशमहाकाव्यम् ४.२५

# ✷ शारदाविनयम् ✷

प्रो. रामदत्तशर्मा
प्लाट नं. १०२, प्रथमतल, पाकेट-१६, सैक्टर-२४, रोहिणी, नवदेहली

(१)

श्वेतकायधरा धवलांशुका,
धवलहंसरूढ़ा श्वेतासना।
कमलजातसुमोदकरी मुदा,
भवतु भव्यस्वभावविकासिनी॥

(२)

कमलकोमल-हस्तचतुष्ट्या,
धृतस्त्रजाकरभूषितपुस्तका।
विमलबुद्धिप्रदा वरदा सदा,
भवतु दिव्यस्वरा निजवीणया॥

(३)

सरसकाव्यकला-सुविकासिनी,
सकललोकसुमङ्गलदायिनी।
अखिलज्ञानसुकोश-धराऽधरा,
भवतु ज्ञान-प्रकाश-प्रसारिणी॥

(४)

गतमतीनसुमतीन् विदधाति या,
निजदयेक्षणतस्त्वरितं नतान्।
बुद्धिविलासकलाकुशलान् सदा,
भवतु मानविवर्धनकारिणी॥

(५)

शरदि चन्द्रप्रभेव प्रभावती,
नवलबालकलेव कलावती।
सपदि ज्ञानबलं ददती च मे,
भवतु हास-युताननधारिणी॥

(६)

सुमनसा पुष्पैर्निभावजैः,
सुकविभिः, सुखमर्चितुमूर्तिका।
सकलजाड्यतमः क्षयकारिणी,
भवतु सर्वप्रदा मम शारदा॥

●

# आचार्यबच्चूलालावस्थिप्रणीतस्य भारतीयदर्शन-बृहत्कोशस्य परिचयः

डॉ. व्रजेद्रकुमारसिंहदेवः
सहायकाचार्यः, श्रीभगवानदासादर्श-संस्कृतमहाविद्यालयः, हरिद्वारम्

आचार्यबच्चूलालावस्थिपादानां बृहत्-कलेवरकृतिः भारतीयदर्शनबृहत्कोशनाम्ना ख्यातिं भजते। बृहत्कोशे शब्दशीर्षकाणि दत्वा तत्र यथोक्तम्- भारतीयदर्शनानां लक्षणानि सावतरणं यथावत् प्रोक्तानि विद्यन्ते। न हि सर्वेषु दर्शनेषु सर्वेषां पारिभाषिकशब्दानां प्रयोगो भवति। तथापि बहूनां तेषां सर्वेषु दर्शनेषु स्वस्वमतानुसारेण परिभाषाव्याख्या च क्रियते। सन्ति कतिपयानि लक्षणानि कस्मिन् कस्मिन् दर्शने लब्धख्यातानि यथा सामान्यलक्षणाप्रत्यासत्तिरिति प्रसिद्धं लभते, प्रतीत्यमुत्पाद्य इति बौद्धदर्शने सप्तभङ्गनय इति जैनदर्शने परिभाष्यते। अन्येषु दर्शनेषु तेषां प्रत्याख्यानायैव पूर्वपक्षत्वेन स्थापना क्रियते।

स्यादेतत् अस्य ग्रन्थस्य टङ्किताः चत्वारिंशत्खण्डा विद्यन्ते। ग्रन्थोऽयं शारदा-प्रकाशन-नवदेहलीतः प्रकाशितः। प्रतिखण्डं टङ्कितखण्डानां चत्वारि खण्डानि समावेश्य दशानां खण्डानां ग्रन्थस्थितिरनुमीयते। टङ्कित-पृष्ठानां संख्या १३३२२ विद्यते। अंश इति प्रथम शब्दोऽन्तिमश्च होम इति।

अस्मिन् ग्रन्थे आयुर्वेददर्शनस्य, व्याकरण-दर्शनस्य च विशेषेण समावेशः कृतः। वर्णानुक्रमेण दर्शनानामिह निर्देशः क्रियते। येन ग्रन्थस्यास्य महिमा प्रकटीभवति।

१-अचिन्त्यभेदाभेदवादः (वेदान्तः), २-अद्वैतवेदान्तः, ३- आयुर्वेददर्शनम्, ४-चार्वाकदर्शनम्, ५- जैनदर्शनम्, ६- द्वैतवेदान्तः (माध्वः), ७-द्वैताद्वैतवेदान्तः (निम्बार्क) ८-न्यायदर्शनम्, ९- प्रत्यभिज्ञादर्शनम ~(काश्मीर शैवाद्वैतः)१०- बौद्ध-दर्शनम्, ११- बौद्धदर्शनम् (माध्यमिकशून्यवादः), १२- बौद्धदर्शनम् (योगाचारविज्ञानवादः), १३- बौद्धदर्शनम् (वैभाषिकसर्वास्तवादः), १४- बौद्धदर्शनम् (सौत्रान्तिकसर्वास्तवादः), १५- मीमांसादर्शनम् १६- मीमांसादर्शनम् (कुमारिलः), १७-मीमांसादर्शनम् (प्रभाकरः), १८- मीमांसादर्शनम् (मण्डनमिश्रः), १९- योगदर्शनम्, २०-विशिष्टाद्वैतवेदान्तः, २१- वेदान्तदर्शनम्, २२-वैशेषिकदर्शनम्, २३- व्याकरणदर्शनम्, २४-शाक्तदर्शनम्, २५- शुद्धद्वैतवेदान्तः, २६-शैवदर्शनम् (द्वैत, विशिष्टाद्वैत, दाक्षिणावत्य नकुलीशः), २७- सांख्यदर्शनम्।

केषु केषु शब्दशीर्षकेषु कस्य कस्य दर्शनस्य विवेचना कृतेति बहुविस्तारधिया नेह

प्रतन्यते। आयुर्वेददर्शनं व्याकरणदर्शनञ्च पुरस्कृत्य वर्णिकामात्रं दीयते।

आयुर्वेददर्शनस्य शब्दशीर्षकाणि- अनुमान, अनुयोग, अनेकान्त, अन्त:करण, अपवर्ग, अपार्थक, अहंकार, अतिवाहिशरीर, आत्मन्, आयुष, इन्द्रिय, उत्तर, उपमान, प्रमाण, उपाय, एकान्त। क्रिया, गुण, ज्ञान, त्रिगुण, द्रव्य, धातु, न्यून। पत्तत्व, परिणामवाद, परिहार, पुनरुक्त, पुरुष, पूर्वपक्ष, पूर्ववत्, अनुमान, प्रकरणासम, प्रकृति, प्रतिष्ठापना, प्रत्यक्ष, प्रयोजन। बुद्धि, भव, मनस्। युक्ति, योग, वयस्, वाक्छल, विरुद्ध विशेष। शरीर, शात्र, संयमसम, साध्य, सामान्य, स्वप्न, हेतु।

व्याकरणदर्शनस्य शब्दशीर्षकाणि- अकर्मक क्रिया, अखण्डाकाराकारित चित्तवृत्ति, अजहत्स्वार्था, अतिदेश, अतिशायन, अद्वैतवाद, अधिकरण (कारक), अध्यारोप, अध्यास, अध्याहार, अध्वन्, अनाहत, अनित्यता, अनिर्वचनीय, अनुलब्धि, अनुबन्ध, अनुमान, अनुयोग, अनुवाद, अनुवृत्ति, अनुव्यवसाय, अनेकान्त, अन्त:करण, अन्यथाख्यातिवाद, अन्योन्याभाव, अन्वाचय, अन्वादेश, अपक्षय, अपवर्ग, अपवाद, अपूर्व, अपोद्धार, अपोह, अभाव, अभिजल्प, अभिज्ञा, अभिद्या, अभिधानियामक, अभिविधि, अभिव्यापक, अभिव्याप्ति, अभिहितान्वयवाद, अभ्यास, अर्थापत्ति, अलातचक्र, अलौकिक, अवयविन्, अविद्या, असत्कार्यवाद, असदध्यास, अस्तित्व। आकाक्षा, आकृति, आख्यात, आत्मन्, आदिकर्म, आयाग, आविर्भाव, आवृत्ति, आसक्ति, इच्छा, इतरेतरयोग, इतरेयराश्रयत्व, इत्थम्भूत, इन्द्रिय, ईर्ष्या, ईश्वर, उत्तरपद, उत्पात, उत्सर्ग, उपकार, उपचार, उपचारसत्ता, उपधान, उपाधि, उपपद, उपमर्द, उपमान, प्रमाण, उपमानोपमेयभाव, उपमेय, उपलक्षण, उपसर्ग, उपसर्जन, उपादान, उपादान कारण, उपादान शब्द, उपादेय, उपाधि, उपाय, ऊह, एकत्व, एकदेश, एकवाक्यता, एकार्थीभाव। करण, कर्त्ता, कर्मकर्त्ता, कर्मकारक, कर्मव्यतिहार, कल्पना, कारक, कार्यिन्, काल, कूटस्थनित्यता, क्रम, क्रिया, क्रियोत्पत्ति, क्रियासमभिहार, क्षण, गुण, गुण-परिणाम, गौण कर्म, गौणी। चित्, चित्त, चैतन्य, जन्म, जहत्स्वार्था, जाति, जातिबाधक, जातिस्फोट, जीव, ज्ञान। तत्त्व तर्क, तात्पर्य, तात्पर्यवृत्ति, तादर्थ्य, तिङन्त, तिङ्प्रत्यय, तिरोभाव, दैष्टिक, द्वित्त्व, धर्मिन् (धर्मी), धातु, नाम, नाश, नास्तिक, नि:श्रेयस, नित्यता, निपात, निमित्त, निरूपास्य, निरूढलक्षण, निर्धारण, निर्विकल्पक प्रत्यक्ष (ज्ञान) निर्विकल्पक स्मृति, न्याय, न्याय्य। पद, पदवृत्ति, परस्फोट, पदार्श (पदप्रतिपाद्य) पदार्थ (प्रमेय), परिणाम, परिणामनित्यता, परिणामनित्यत्ववाद, परिनिष्ठित, परिसंख्या, परोक्ष, पर्युदास, पश्यन्ती, पूर्वपद्, प्रकरण, प्रकर्ष, प्रकृति, प्रचय, प्रतिभा (प्रतिभान), प्रत्यक्ष, प्रत्यभिज्ञान, प्रत्यय, प्रत्यवमर्श, प्रत्याहार, प्रमा (प्रमिति), प्रमाण, प्रयोजक, प्रवर्तना, प्रवृत्ति, प्रवृत्तिनित्यता, प्रवृत्तिनिमित्त, प्रसज्यप्रतिषेध, प्रहाणा, प्राप्यहारिता तथा प्राप्यकारिता, प्रामाण्यवाद, प्रेरणा, फल। बहुत्व, बोध, बाधित, बाध्यबाधक भाव, बिन्दु, बुद्धि, बुद्धिपरिणाम, बुद्धिसत्कार्यवाद, बुद्धिसत्ख्यातिवाद, ब्रह्मन्, भाव, भावना (आख्यातार्थ) भावपरिवर्तन, भावविकार। मङ्गलवाद, मनस, महावाक्य, माया (वाद), मुक्ति, मुख्यार्थ, मूर्त्ति, मूलाविद्या, मोक्ष। योगज प्रत्यक्ष, योग्यता, यौगपद्य, लक्षणा, लिङ्ग (पुँल्लिङ्ग आदि), लिङ् प्रमाण, वर्णस्फोट,

वाक्यवृत्ति, वाक्यस्फोट, वाक्यार्थ, विकरण, विकल्प, विकल्पवृत्ति, विप्रतिषेध, विभाग, विभाषा, विमर्श, विवर्त, विशेष, विशेषण, विशेषण-विशेष्यभाव, विशेष्य, विषयता, वीप्सा, वैखरी, वैशिष्ट्य, व्यक्ति, व्यक्तिविस्फोट, व्यञ्जना, व्यपदेश, व्यपेक्षा, व्यवस्था, व्यवस्थित, विभाषा, व्यावहारिकसत्य (सत्ता)। शक्ति, शक्ति (वाचकत्व) शब्द, शब्दप्रमाण, शब्दब्रह्मवाद, शब्दवृत्ति, शाब्दबोध, शात्र, शुद्धा लक्षणा, शेष। संयुक्त-संयोग, संयोग, संवर्त, संसर्ग, संस्कार, संस्थान, संहिता, सत्ताऽद्वैतवाद, सत्प्रतिसत्ता, सामान्यलक्षणा, प्रत्यासत्ति, सामान्य विधि, सायुज्य, सारूप्य, सिद्ध, सूक्ष्म, सूक्ष्मवाक्, स्थिति, स्फोट, प्रामाण्यवाद, स्वप्न, स्वाङ्ग, स्वार्थ, हेतु। इति।

संक्षेपेण परिचयाय ध्यानचतुष्टयं प्रस्तूयते। तथा हि- **बौद्धों ने चार ध्यानों को अष्टाङ्गिक मार्ग के अन्तर्गत लिया है।**

(भा.द.बृ. खण्ड १७, पृ. ५३५९)

'अष्टाङ्गिकमार्ग शीर्षक पर द्रष्टव्य है कि मार्ग के आठ अङ्गों में सम्यक्समाधि अन्तिम है जिसके चार ध्यान बताये गये हैं- **सम्यक्समाधिः कतमः चत्वारि ध्यानानि।**

(अर्थविनिश्चय सूत्र १९.८)

अर्थात् चार ध्यानों का सम्यक्समाधि कहते हैं -

१- इह भिक्षवो भिक्षुर्विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति। (तत्रैव)

अर्थात् जो भिक्षु कामनाओं तथा पापयुक्त अकुशल कर्मों से पृथक् वितर्क एवं विचार के साथ विवेक-जनित प्रीतिसुख प्राप्त करता है वही प्रीतिसुख उस भिक्षु का प्रथम ध्यान है। वितर्क तथा विचार के लिये संस्कृत धर्म शीर्षक आकलनीय है।

२- स वितर्कविचाराणां व्युपशमादध्यात्म-सम्प्रसादाच्चेतरस एकोतीभावादवितर्कमविचारं समाधिजं, प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति। (तत्रैव)

अर्थात् जब वितर्कों एवं विचारों के पूर्णतः शमन से आन्तरिक निर्मलता आ जाती है तब चित्त की एकान्तता (एकमात्र सन्तान या उतीभाव) प्राप्त होता है जिससे निर्वितर्क एवं निर्विचार समाधि जन्य प्रीतिसुख प्राप्त होता है और यह द्वितीय ध्यान है।

३- सा प्रीतिर्विरादुपेक्षको विहरति स्मृतः सम्प्रजानन् सुखं च कायेन प्रतिसंवेदयति। यत् तदार्या आचक्षते उपेक्षकः स्मृतिमान् सुखविहारीति। तृतीयं ध्यानमुपसम्पद्य विहरति। (तत्रैव)

अर्थात् तृतीय ध्यान में प्रीति से विराग के कारण उपेक्षा, स्मृति एवं प्रज्ञा का उदय होता है। अतः शरीरमात्र से सुख का संवेदन हो चलता है। ऐसे योगी को आर्यों ने उपेक्षक, स्मृतिमान् तथा सुखविहारी कहा है।

४- स सुखस्य च प्रहाणाद् दुखस्य च प्रहाणात् पूर्वमेव च सौमनस्य-दौर्मनस्ययोरस्तंमाद् अदुखासुखमुपेक्षास्मृतिपरिशुं चतुर्थं ध्यानमुपसम्पद्य विहरति॥ (तत्रैव)

अर्थात् सुख तथा दुख के प्रहाण से पहले ही सौमनस्य तथा दौमनस्य के अस्त हो जाने पर (चारों इन्द्रियों के उच्छेद से) सुखदुख रहित तथा

उपेक्षा एवं स्मृति द्वारा परिशुद्ध चतुर्थ ध्यान बनता है।

इन चारों ध्यानों का सोपानक्रम है। (१) प्रथम ध्यान में वितर्क, विचार, प्रीति एवं सुख का समावेश रहता है। (२) द्वितीय ध्यान में तर्क एवं विचार नहीं रहते किन्तु प्रीति एवं सुख यथावत् रहते हैं। (३) तृतीय ध्यान में प्रीति का त्याग हो जाता है और सुख के साथ उपेक्षा एवं स्मृति का उपस्थान होता है। (४) चतुर्थ ध्यान में सुखरहित अवस्था है। प्रीति, स्मृति तथा उपेक्षा बोधि के सात अंगों में परिगणित है।'

(भा.द.बृ./पृ. ११८६५-११८६६)

ईश्वरशीर्षके प्रत्यभिज्ञा-शैवदर्शनाभिमतम् ईश्वरस्वरूपं गृहीत्वा विरंस्यते। तथा हि-

**शबला चितिरुच्येत परस्य पररूपिणी।**
**सा शक्तिः परमेशस्य संस्थिता द्रव्यकर्मवत्॥**

(सि.सू. ७.१४)

**ततः स्थूलैर्मत्रमयैरङ्गै सर्वक्रियापरा।**
**भवतीश्वररूपेण स्वकार्याखिलरूपिणी॥**

(तत्रैव ७.२७)

उत्पलदेवः प्राह- **आत्मानयत् एवायं ज्ञेयीकुर्यात् पृथक्स्थितिः। ज्ञेयं न तु तदौन्मुख्यात् खण्डयेतास्य स्वतन्त्रता॥ स्वातत्र्यान्मुक्तमात्मानं स्वातत्र्याददृयात्मनः। प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत्॥**

(ईश्वरप्रत्यभिज्ञा १.५.१५-१६)

पुनश्च- प्रकाशात्मा परमेश्वरः स्वात्मानं ज्ञात्रैकरूपत्वाज्ञेयमपि ज्ञेयीकरोति नीलादित्वेन चकास्ति। ........ ईश्वर-आत्मेत्यादि संकलेषु चरनिर्मितस्य इदन्तया परामर्शः। स्वातत्र्यं त्वहंपरामर्शरूपम्। (विमर्शिनी)

अभिनवगुप्तपादाचार्या आहु-

**शिवशक्तिसदाशिवतमीश्वरविद्यामयीं च तत्त्वदशाम्। शक्तीनां पञ्चानां विभक्तभावेन भासयति॥**

(परमार्थसारः)

किञ्च -

**शक्तयश्चिन्निर्वृत्तीच्छाज्ञानक्रियाख्याः पञ्च।**

(योगाचार्यविवृति)

वरदराज उद्धरणं प्रस्तौति -

**ईश्वरो बहिरुन्मेषो निमेषोन्तः सदाशिवं।**
**सामानाधिकरण्यं च सद्विद्याहमिदधियो॥**

(शिवसूत्रवार्तिकम्, १.९८-९९)

स्पष्टीकरणमेवमुक्तम्- शिवतत्त्वं नामेच्छाज्ञानक्रियात्मककेवल-पूर्णानन्दस्वभावरूपः परमशिव एव। अस्य जगत् स्रष्टुमिच्छां परिगृहीतवन्तः परमेश्वरस्य प्रथमस्पन्द एव इच्छाशक्तितत्त्वप्रतिहतेच्छत्वात्। सदैवाङ्कुरायमाणमिदं जगत् स्वात्मनाहन्तयाच्छाद्य स्थितं रूपं सदाशिवतत्त्वम्। अङ्कुरितं जगदहन्तयावृत्य स्थितमीश्वरतत्त्वम्। अहन्तेदन्तयोरैक्यप्रतिपत्तिः शुद्धविद्या।

(पराप्रवेशिकाः पृ. ६७)

**स एवेश्वरतत्त्वं स्यात् पश्यत् विश्वमिदन्तया।** (अनु. २०) **विश्वं पश्चात् पश्यन्निदन्तया निखिलमीश्वरो नातः॥**

(षत्रिंशतत्त्वसन्दोह)

अनेन प्रकारेण भारतीयदर्शनबृहत्कोशस्य सामान्यः परिचयः प्रस्तुतः। इति शम्॥

# ✷ श्रीमद्दयानन्द-पञ्चकम् ✷

डॉ. प्रशस्यमित्र शास्त्री
साहित्य-अकादमी-पुरस्कारेण पुरस्कृतः राष्ट्रपतिसम्मानितश्च
बी. २९ आनन्दनगरम्, (कारावासमार्गः) रायबरेली (उ.प्र.)

(१)

वेदानां भुवि यः प्रकाशमतुलं तेने सुविज्ञानवान् ,
मूर्तीनामिह पूजनं श्रुतिपरं मेने न तर्काश्रितः ।
शास्त्राणामवगाहनेन नितरां जज्ञे नरान् बौद्धिकान् ,
सत्यार्थ-प्रतिपादकं मुनिवरं वन्दे सदा श्रद्धया ॥

(२)

नाम्ना यस्तु दया-प्रधान-पदभाग् आनन्दयुक्तो महान्,
कण्ठे यस्य सरस्वती श्रुतिमती निष्णाति सा पावनी।
नाना-शास्त्र-विशारदो यतिवरो नृणां समुद्धारकः,
आर्याणां सुखदं समाजममितं संस्थाप्य यः शोभते ॥

(३)

स्वातन्त्र्योत्कृष्टताया जनमनसि सदा भावमुद्भावयन्ती,
पाखण्डाऽज्ञानजन्यं गहनमिह तमः सर्वथा ध्वंसयन्ती।
आर्षग्रन्थेषु निष्ठा जनयति सकलं ज्ञानमित्यावहन्ती,
सर्वस्मिन् देश-काले प्रसरतु सुखदा श्रीदयानन्दवाणी ॥

(४)

आर्याणां या प्रशस्ता त्रिभुवनविदिता संस्कृतिर्वेदमूला ,
यस्यां सर्वं रहस्यं निगमतलगतं बुद्धिविज्ञानयुक्तम् ।
प्राचीनानाम् ऋषीणामभिमतमतुलं ग्राह्यमस्तीति पक्षम् ,
लोके सुस्थापयन्त्यो विजयमधिगताः श्रीदयानन्दवाचः ॥

(५)

यज्ञानां सुप्रतिष्ठां पुनरिह भुवने कर्तुकामो मनस्वी ,
संन्यासी वेदविद्याप्रवचननिरतः श्रीदयानन्दनामा ।
नित्यं सम्पादनीया नियमविहिताः पञ्चयज्ञा महान्तः ,
इत्येवं निर्दिशन् स सरलविधियुतं जीवनं सच्चकार ॥

●

# ✷ पुराणेषु रासविमर्श ✷

बबीता लसियाला
शोधच्छात्रा- श्रीभगवानदास-आदर्श-संस्कृतमहाविद्यालय:, हरिद्वारम्

भारतीयसंस्कृते समुचित-परिशीलनार्थं वेदोपबृहणकारणामितिहासपुराणानमध्ययनस्य आवश्यकमस्ति। यतो हि वेदस्मृति-पुराणानामाश्रयेणाद्य यावदियं संस्कृतिः प्रचलति। महर्षिणा व्यासेन अलौकिक्या तपसा परमात्मनोऽनुकम्पया वेदानां यथार्थमवगम्य पुराणस्य प्रणयनं कृतम्। याज्ञवल्क्यस्मृतौ चतुर्दशविद्यानां गणनाप्रसङ्गे केवलं पुराणस्यैव गणाना कृताऽस्ति। पुराणस्यावतरणविषये विभिन्नेषु पुराणेषु तथा सूत्रग्रन्थेषु विचारो विहितः। तेषां विवेचनेन प्रतीतिर्भवति यत्- पुराणस्य विकासे द्वे धारे स्पष्टतः परिदृश्येते, यथा-

१. व्यासपूर्वधारा तथा २. व्यासोत्तरधारा।

व्यासस्तु मुख्यतः पुराणसंहितायाः निर्माणमकरोत्। अतः पुराणानां सुव्यवस्थितं स्वरूपं वेदव्यासस्यालोकसामान्यं कार्यमेव। परन्तु तत्पूर्वं प्राचीनतरयुगस्य साहित्यिक-जगति पुराणं तु अव्यवस्थितस्ततो विकीर्ण लोकवृत्तात्मक-विद्याविशेष आसीत्। प्राचीनग्रन्थेषु नवीनग्रन्थेषु च पुराणशब्दस्य प्रयोगः परिदृश्यते न तु पुराणसंहितायाः प्रयोगः, तर्हि प्रथमतः इयं कस्यचिद् ग्रन्थविशेषस्य द्योतिका न भूत्वा कस्यचिद् विद्याविशेषस्य वाचिका एवाऽसीतत्।

**रासस्य स्वरूपम्-** रासस्य मूलोद्गमो भरतमुने नाट्यशात्रात् प्रारम्भो जातः, परन्तु ततः पूर्वमेव लोककलारूपे विधेयं प्रसिद्धा बभूव। नाट्यशात्रे रासकः, नाट्यरासकः, हल्लीसकः इति त्रिषु विभागेषु रासस्य वर्गीकृतः संजातः। रासस्यान्तर्गते हल्लीसकं नृत्यमायाति, तत्तु रासलीलायाः प्रचलितं स्वरूपं निर्देशति। प्रकारान्तरभेदेन रासस्य वर्णनं श्रीमद्भागवतपुराणस्यातिरिक्तं हरिवंश-ब्रह्मवैवर्तपुराण-विष्णुपुराण-भविष्योत्तरपुराण-गर्गसंहिताप्रभृतिषु विभिन्नपुराणेषु प्राप्यते। अभिनवगुप्तपादस्य कथनमासीत् यत्- श्रीकृष्णस्य गोपीभिः सह यन्नृत्यमासीत् तदेव नृत्यं हि रासो भवति। किं नाम हल्लीसकनृत्यमिति जिज्ञासायाम् अभिनवगुप्तपादेन अभिनवभारतीटीकायां निगद्यते- मण्डलाकारे यन्नृत्यं भवति तथा श्रीकृष्णो गोपीजनवदेको नेता यत्र तिष्ठति, तदेव हल्लीसकं नृत्यं कथ्यते। यत्र चतुषष्ठियुगलं यावत् नर्तनं कुर्वन्ति तथा नानाप्रकारै ताल-लययुक्तै नर्तनं स्यात्, तदेव रासकनृत्यमभिधीयते।[१]

---

१. रास पञ्चाध्यायी, श्री सुबोधिनी, भूमिका, पण्डित जगन्नाथ चतुर्वेदी, पृ.४६

अनेन प्रकारेण रासनृत्यस्वरूपमाभाषयन् विद्वांस: कथयन्ति यत्- नायक-नायिकानां साहचर्येण मण्डलाकारसमूहयुक्तनृत्यस्यायोजनं हि रासो भवतीति। यदुक्तमभिनवगुप्तपादेन-

**मण्डलेन तु यन्नृत्तं हल्लीसकमिति स्मृतम्।**
**एकस्तत्र तु नेता स्यादुगोपत्रीणां यथा हरि:॥**



काव्यशात्राणां रासक-नाट्यरासकविषये कथनमस्ति यत्- भोज तथा शारदातनय काव्य शात्र के लेखकों ने रासक तथा नाट्य रासक नृत्य के दो भेद बताए हैं। उन्होंने रासक लक्षण 'षोडशद्वादशाष्टो वा यस्मिन्नृत्यन्ति नायिका:।'

'पुराणसाहित्ये रासवर्णनं प्राप्येते। श्रीमद्भागवतपुराणस्य दशमस्कन्धे २९ अध्यायत: ३३ अध्यायं यावत् भगवत: श्रीकृष्णस्य रासलीलाया: प्रसङ्ग: प्राप्यते। तत्र रास-पञ्चाध्यायीमध्ये श्रीमदभागवत: पञ्चप्राण-स्वरूपमस्ति। भगवतो दिव्यलीलाभावं नावबोध्य केवलं बाह्यदृष्ट्या यदि अवलोक्यते तर्हि सर्वा कथा: शृङ्गाररसपूर्णं भविष्यति तथा अस्मात् मनुष्यो भान्तिग्रस्तभवितुं शक्यते। अनेन सम्भवत: श्रीशुकदेवेन उपर्युक्तश्लोके प्रथम: शब्द: 'भगवान्' इति प्रदत्त:। तद्यथा- **भगवानपि ता रात्री शरदोत्फुल्लमल्लिका:। वीक्ष्य रन्तु मनश्चक्रे योगमायामुपाश्रित:॥**[1]

रासशब्दस्य मूलोऽर्थो **रसो** भवति। रस: स्वयं भगवान् श्रीकृष्ण्:। **रसो वै स:।**[2] यस्यां दिव्यक्रीडायां एको रसो हि अनेकरसरूपेषु अनन्तरसास्वादनं करोति, एको रसो हि रससमूहरूपे प्रकटो भूत्वा स्वयं हि आस्वाद-आस्वादक-लीला-धाम-विभिन्नेषु आलम्बनोद्दीपन-रूपेषु च क्रीडति- तस्य नाम 'रास' इति। अतो रासलीलेयं लीलामयस्य भगवत: श्रीकृष्णस्य स्वरूपो वर्तते।

समग्रे विश्वस्मिन् कस्या अपि सभ्यजाते पार्श्वे पुराणसदृशं सर्वाङ्गपूर्णो न कोऽपि ग्रन्थो विद्यते। पुराणैरेव भारतीयादर्शजीवनस्य भारतीयाया: सभ्यताया: संस्कृते विद्याया: वैभवस्य, भारतीयानां ज्ञानगरिम्ण: उत्कर्षस्य च वास्तविकं ज्ञानं भवति। संस्कृतसाहित्येऽपि पुराणानां स्थानं महदुन्नतमस्ति।

महर्षिणा व्यासेनाष्टादशपुराणेषु सर्वेषां धर्माणां सार: 'परोपकार: पुण्यम्, परपीडनं च महत्पापम्' इति निर्दिष्ट:। अयं मानवताया: महान् मौलिक आदर्शोऽस्ति। तद्यथा -

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकार: पुण्याय पापाय परपीडनम्॥**[3]

१. श्रीमद्भागवते १०/२९/१
२. तैत्ति.उपनिषदि/२/७
३. प.पु. (गवेषणात्मकभाग:) पृ.२८

# ✷ नागो राजकुमारः ✷

लेखिका- प्रभा पन्तः

अनुवादकः- डॉ. प्रकाशचन्द्रपन्तः 'दीपः'

सहायकाचार्यः, शिक्षाशास्त्रविभागः, उत्तराखण्ड-संस्कृत-विश्वविद्यालयः (उत्तराखण्डम्)

एकः राजा आसीत् तस्य च एका राज्ञी। तयोः विवाहस्य बहूनि वर्षाणि व्यतीतानि परं तथापि न कापि सन्ततिः जाता। एतस्मात् कारणात् चिन्तितः राजा ब्राह्मणम् आहूय स्वजन्मकुण्डलीं दर्शयन् पृष्टवान्- भो ब्राह्मण! भवान् एतत् विज्ञापयतु यद् मम भाग्ये सन्ततिः अस्ति न वेति? ब्राह्मणः अवदत्- महाराज! यदि अहं भवन्तं सन्तानप्राप्तेः उपायं विज्ञापयेयं तर्हि भवान् मह्यं किं दास्यति? राजोवाच- यदि आवयोः सन्ततिः भविष्यति तर्हि अहं भवते नैजम अर्द्धं-राज्यं दास्यामि। ब्राह्मणः किमपि न जानाति स्म, सः राजानं प्रासादयितुम् एवमेव उक्तवान् यत् कुण्डल्यनुसारं भवान् पुत्रवान् भवेत् इति। राजा अवदत्- अस्तु कः उपायः? ब्राह्मणः अब्रबीत्- यथा अहं वदिष्यामि तथैव भवता करणीयम् इति। राजोवाच- किं करणीयम्? वदतु। ब्राह्मणेन कथितं सर्वप्रथमं तु भवता मम निर्देशानुसारं काचित् दूती आनेतव्या। राजा तन्निर्दिष्टां दूतीम् आनीतवान्।

ब्राह्मणः दूतीम् उक्तवान्- त्वं राज्याः उदरे शाटिकां वेष्टयित्वा शनैःशनैः प्रतिदिनं तां वर्धयिष्यसि येन राजा चिन्तयेत् यत् राज्ञी गर्भवती अस्ति इति। ब्राह्मणः राज्ञीम् अपि उक्तवान् यद् एवं करणेन तु पुत्रः एव भविष्यति किन्तु भवत्या इयं वार्ता कदापि अन्यस्मै न वक्तव्या। ब्राह्मणः दूतीम् अपि अकथयत्- यदि त्वया एषा वर्ता कामपि कम् अपि वा कथिता तर्हि राजा ज्ञाते सति आवयोः शिरोच्छेदं करिष्यति। राजानं तु सः पूर्वमेव उक्तवान् यद्- नवमासपर्यन्तं भवता राज्याः मुखं न द्रष्टव्यम् इति।

गच्छता कालेन राज्या प्रसवकालः अभवत्। राजा दूतीम् आदिष्टवान् या कापि सन्ततिः भवेत् त्वं शीघ्रं मां सूचय। राजा बहुः प्रसन्नः आसीत् परं राज्ञी कुशलिनी भविष्यति न वेति चिन्तया व्यग्रः अपि। व्याकुलतया राजा प्रकोष्ठस्य बहिः गतागतं करोति स्म। किञ्चित्कालानन्तरं विना सन्ततिम् एव दूती उच्चैः अवदत्- महाराज! भवतः राज्ञो पुत्रं प्रसूतवती इति। एतत् श्रुत्वा आश्चर्यचकिता राज्ञी दूतीम् उक्तवती- किमर्थं त्वम् असत्यं वदसि? दूती अवदत्- आर्ये! भवती तूष्णीं तिष्ठतु, यदि भवती सत्यं वदिष्यति यत् कापि सन्ततिः नास्ति तर्हि राजा अस्माकं त्रयाणाम् एव शिरोच्छेदं कुर्यात्। राज्ञी तु भीत्या मौनम् अतिष्ठत्। राजा पुत्रोत्पत्तिसूचनां श्रुत्वा प्रसन्नचित्तः पुत्रं द्रष्टुम् अन्तः प्रविष्टवान् परं द्वारे एव ब्राह्मणः राजानं निवार्य उक्तवान्- महाराज! द्वादशवर्षपर्यन्तं भवान् पुत्रस्य मुखदर्शनं कर्तुं न शक्नोति। यदि गुप्तरूपेणापि भवान् पुत्रं द्रष्टुं यत्नं करिष्यति तर्हि तस्य मृत्युः भविष्यति। द्वादशवर्षाणामनन्तरं यदा तस्य विवाहः भविष्यति तदा भवान् तस्य मुखं

द्रष्टुं शक्ष्यति। ब्राह्मणः पूर्वमेव राजानम् उक्तवान् आसीत् यद् यथा अहं वदिष्यामि तथैव भवता करणीयम् इति। राजा ब्राह्मणवचनम् अङ्गीकृतवान्। तेन विचारितं यद् अद्यपर्यन्तं यदि पुत्रदर्शनं न जातं तर्हि द्वादशवर्षाणि इतोऽपि प्रतीक्षां करिष्यामि।

इत्थं गच्छता कालेन द्वादशवर्षाणि अपि व्यतीतानि। इदानीं तु ब्राह्मणः राजानं न्यवेदयत्- महाराज! राजकुमाराय कन्याम् अन्विष्यतु। राज्ञी तु साम्प्रतं यावदपि राजानं सत्यं न उक्तवती एव। यतोहि ब्राह्मणेन कठोरतया सा निर्दिष्टा आसीत् यद्यदि राजा सत्यं ज्ञास्यति तर्हि अस्माकं त्रयाणां मृत्युः सुनिश्चितः इति। अत एव राज्ञी न किमपि उक्तवती। अथैकदा राजा ब्राह्मणम् अवादीत् यद् राजकुमारस्य कृते कन्या प्राप्ता वा इति। कन्यापक्षीयाः राजानम् उक्तवन्तः यद् वयं वरं द्रष्टुम् इच्छामः इति। तदा राजा अवादीत्- वरे न कोऽपि दोषः मा विलोक्य भवन्तः निश्चयेन सन्तुष्टाः स्युः, अतः विवाहदिने एव पश्यन्तु इति। राज्ञः वचनेषु कन्यापक्षीयाणां विश्वासः समजायत। विवाहस्य मुहूर्त्तनिश्चयं कृत्वा सम्पूर्णे राज्ये, प्रतिवेशिराज्येभ्यश्च निमन्त्रणपत्राणि प्रेषितानि।

यथा-यथा विवाहस्य दिनं सन्निकटं भवति स्म तथा तथा ब्राह्मणराज्ञी-दूतीनां चिन्ताऽपि वर्धते स्म। विवाहस्य दिने त्रिभिः वरस्य शिविका पुष्पादिभिः अलङ्कृता, तस्यां च भगवतः गणेशस्य मूर्तिः स्थापिता। शिविकया सह वरयात्रा कन्यागृहं प्रति प्रस्थिता। मार्गे एकस्मिन् स्थाने विश्रान्तिं कर्तुं वरयात्रा स्थिता। शिविका तु तत्रैव कोणे द्वयोः आम्रवृक्षयोः मध्ये स्थापिता। वरयात्रिणः आनन्देन जलादिकं पिबन्ति स्म। तयोः एकस्मिन् वृक्षे नाग-नागिन्यौ (सर्पः सर्पिणी) वसतः स्म। ब्राह्मणेन शिविकायाः अन्तः दृष्ट्वा पृष्टम्- चायं पास्यति किम्? मूर्तिः किं वदेत्? इदं सर्वं सर्पः सर्पिणी च दृष्टवन्तौ। ताभ्यां ब्राह्मणस्य एतत् कार्यं दृष्ट्वा सर्वं विज्ञातम्। सर्पिणी सर्पम् उक्तवती- पश्य, यदि एतत् सर्वं राज्ञा ज्ञास्यति तर्हि वराकाः त्रयोऽपि मृत्युदण्डं प्राप्स्यन्ति। अतः त्वं वरस्य रूपं धृत्वा शिविकायाम् उपविश। यदा वरयात्रा प्रत्यागमिष्यति तदा अत्रैव अवतर। नागः नागिन्याः वार्ताम् अङ्गीकृत्य, वरस्य रूपं धृत्वा शिविकायाम् उपाविशच्च। राजा ब्राह्मणं पृष्टवान्- राजकुमारः न तु चायं पिबति नैव च जलम्, कारणं किम्? एकवारं पुनः पृष्ट्वा आगच्छतु इति। ब्राह्मणेन यदा शिविकायाः अन्तः अवलोकितं तदा सः मूर्त्याः स्थाने वरम् उपविष्टं विलोक्य चकितः बभूव, झटिति आगत्य राजानं प्रत्यवादीत् च- आम् आम् महाराज! राजकुमारः जलं याचते। राजकुमाराय जलं दत्त्वा वरयात्रा पुनः प्रस्थिता।

अथ किञ्चिद् अग्रे गत्वा शिविकावाहकाः राजानम् उक्तवन्तः- महाराज! शिविकायाः भारः वर्धते। इतोऽपि वयम् अग्रे नेतुम् असमर्थाः स्मः। राजा अवादीत्- किम् वदन्ति भवन्तः गृहात् आनीय एतावत्पर्यन्तं तु सर्वं समीचीनम् आसीत्? इदानीं सहसा एव कथं भारः वर्धितः शिविकावाहकाः उक्तवन्तः- महाराज! वयं सत्यं वदामः इदानीं शिविकायाः पूर्वापेक्षया अधिकः भारः अस्ति। राजा विनम्रभावेन उक्तवान्- अहं युष्मभ्यम् अधिकं धनं दास्यामि, यूयं शनैःशनैः चलत इति। ते उष्णवन्तः- अस्तु महाराज!, किन्तु इतोऽपि त्रिचतुराः जनाः भारं वोढुं प्रेषणीयाः। चतुःपञ्चजनाः यथा कथञ्चित् कन्यागृहं यावत् शिविकां नीतवन्तः। तत्र गत्वा यदा राजकुमारः शिविकायाः बहिः आनीतः तदा राजा निजपुत्रं

विलोक्य झटिति आलिङ्गनम् अकरोत्। राजा तत्कालं स्वकीयम् अर्द्धं राज्यं ब्राह्मणाय अददात् च।

नाग-राजकुमारेण सह राजकुमार्याः विवाहो बभूव। वरयात्रा आगमनकाले पुनः तस्मिन् एव स्थाने विश्रमार्थं स्थिता। शिविका पुनः तयोः एव आम्रवृक्षयोः मध्ये स्थापिता। वरयात्रिणः सर्वेऽपि यत्र तत्र उपविष्टवन्तः। नागः शिविकायाः अवतीर्य नागरूपे एव नागिन्याः समीपं (वृक्षे) अगच्छत्। नागं विलोक्य तस्य पत्नी (नागिनी) उक्तवती- अरे! त्वं तु अत्र समागतः अधुना किं भविष्यति? गृहं गत्वाऽपि सर्वे वरं वधूं च द्रष्टुम् आगमिष्यन्ति, त्वं पुनः राजकुमारस्य रूपं धृत्वा शिविकायां गच्छ। यदा कापि समस्या भवेत् अथवा कोऽपि त्वां मारयितुम् आगच्छेत् तदा त्वं मां स्मर, अहं तत्कालं तव सहायतां कर्तुम् आगमिष्यामि इति। नागः पुनः, राजकुमारस्य रूपं धृत्वा शिविकायाम् उपविष्टः। भोजनादिकं कृत्वा वरयात्रा ततः प्रस्थिता।

राजभवने तु राज्ञी दूती च रुदतः स्म। सर्वे राज्ञीं कथयन्ति स्म यद् भवत्याः तु वधूः आगच्छति, भवत्याः तु प्रसन्नता भवेत्। परं भवती किमर्थं रोदिति? का वार्ता अस्ति? दूती अब्रवीत्- महाराज्ञ्याः शिरोवेदना अस्ति, एतस्यै औषधम् अपि को वा दद्यात्? ताः महिलाः एवम् आलपन्त्यः आसन् तदैव वरयात्रा अपि समागता। विवाहस्य सर्वाणि कार्याणि निर्विघ्नं समीचीनतया सम्पन्नानि। नागः इदानीं राजकुमारस्य एव रूपे आसीत्। तत्र स्थित्वा यदा तस्य षट्सप्तमासाः व्यतीताः तदा नागिनी बहुचिन्तिता अभवत्। सा अचिन्तयत् यत् परोपकाराय मया तु निजं गृहम् एव विनाशितम्। नागः तु मामेव विस्मृतवान्। सा नागम् आनेतुं राजभवनं प्रति प्रस्थिता। नागराजकुमारः निजपत्न्या सह राजभवनस्य तृतीये तले निवसति स्म। अर्धरात्रौ यदा नागिनी अन्विष्यन्ती तस्य प्रकोष्ठं प्राप्तवती तदा तया दृष्टम्- उभावपि मधुरनिद्रायां स्तः। तया विचारितम्- यदि राजकुमारं दशामि तर्हि अहम् एव वैधव्यं प्राप्नुयाम्? यदि राजकुमारीं दशामि तर्हि तस्याः मातापितरौ रोत्स्यतः। नागिनी किङ्कर्तव्यविमूढा बभूव। अन्ततोगत्वा तया विनिश्चितं यत् प्रातःकाले सर्वेषां समक्षं रहस्यमेतद् उद्घाटयिष्यामि (कथयिष्यामि) इदं विचार्य नागिनी तस्मिन् एव पर्यङ्को एकस्मिन् कोणे शयनम् अकरोत्।

प्रातः उत्थाय तया विचारितं यद् अहं तु सर्पिणी अस्मि, यदि कोऽपि मां द्रक्ष्यति तर्हि निश्चयेन मां मारयिष्यति, अतः मया अपि मनुष्यरूपं ग्रहीतव्यम् इति। सर्पिण्याम् इत्थं विचारयन्त्यां राजा प्रज्ज्वलत् काष्ठमेकं प्रहृतवान् यतोहि दूती पूर्वमेव सूचितवती आसीत् यद् राजकुमारस्य पर्यङ्के सर्पिणी अस्ति इति। राज्ञा सर्पिणी मारिता, किन्तु तदनन्तरं, तस्य मनसि महती शङ्का चिन्ता च सञ्जाता। राज्ञा विचारितं यद् जनाः वदन्ति सर्पिण्याः हननेन पापं भवति, न जाने अधुना किं भविष्यति? सर्वे उक्तवन्तः यद् भवता तु राजकुमारस्य प्राणरक्षायै सर्पिणी मारिता, अतः किमपि पापं नास्ति। इदानीं झटिति मृतां सर्पिणीं बहिः प्रक्षिप्तुं व्यवस्थां करोतु। राजकुमारः उक्तवान् नहि नहि एतां बहिः मा क्षिपन्तु। तदपेक्षया तु अहम् एतां भूमिगर्ते स्थापयामि। (राजकुमारः सर्पिणीं (निजपत्नीं) ज्ञातवान् पूर्वमेव) सः सर्पिणीं शिविकायां नीतवान्। भूमौ गर्तं निर्माय सर्पिण्याः मृतशरीरं तत्र स्थापितवान्। तदनन्तरं नागः निश्चिन्तः भूत्वा राजकुमारस्य एव रूपे न्यवसत्।

[कूर्माचलीय-लोककथातः साभारम्]

# ✷ वृष्टिजलं रक्षणीयम् ✷

डॉ. रामकिशोरमिश्रः
पूर्वोपाचार्यः पूर्वसंस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः,
खेकड़ा (बागपत) उत्तरप्रदेशः

(१)

यत्र तत्र च सर्वत्र देवो वर्षति भारते।
किन्तु वृष्टिजलमत्र सागरं प्रति गच्छति॥

(२)

अत एव जलाऽभावो निदाघे त्वनुभूयते।
पिपासिता वन्यजीवाः कुर्वन्ति जलान्वेषणम्॥

(३)

तेऽत्र ग्रामान् प्रविशन्ति कपयः सदनानि च।
पिपासाशमनाऽभावे क्वचिच्च मयूरा मृताः॥

(४)

एतादृशीं भयङ्करीं निवारयितुं च स्थितिम्।
प्रयत्नो वर्षासमये कर्त्तव्यो मानवैरपि॥

(५)

सरांसि रक्षणीयानि वनेषु यत्र तत्र च।
तटाकाश्च निर्माणीयाः सर्वथा जलप्राप्तये॥

(६)

जलसंग्रहस्थलानि भवितुं शक्नुवन्ति चेत्।
तानि च निर्माणीयानि रक्षणीयानि सर्वदा॥

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
हरिद्वार-स्थितस्य
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकांगड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्, श्री..........

(७)

ग्रामाणां समीपे पूर्वं तटाका आसन्ये स्थिताः।
ते सर्वे ह्युज्जीवनीयाः सलिलं प्राप्तुं प्राणिनाम्॥

(८)

तर्हि ग्रीष्मेऽपि तोयस्य सुलभत्वं भविष्यति।
अन्यथाऽत्र मरिष्यन्ति शुष्का भूत्वा वृक्षा अपि॥

(९)

अतः प्रयत्नः क्रियतां सम्प्रति जलरक्षणे।
रामकिशोरमिश्रेण जलमुपलब्धं भवेत्॥

●

मुद्रकेण, प्रकाशकेन **डॉ. हरिगोपालशास्त्रिणा** ज्वालापुर-स्थिते **'न्यू जे.एन. स्टेशनरी मार्ट'** नामके मुद्रणालये मुद्रापयित्वा **'भारतोदयः'** मासिकं पत्रं प्राकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
**सम्पादकः डॉ. हरिगोपालशास्त्री**